# શિવસ્તુતિઃ
# (લઙ્કેશ્વર વિરચિતા)

## Shivastutih
## (Langeshvara Virachitaa)

---

શિવસ્તુતિઃ
(લઙ્કેશ્વર વિરચિતા)

ગલે કલિતકાલિમઃ પ્રકટિતેન્દુભાલસ્થલે વિનાટિતજટોત્કરં રુચિરપાણિપાથોરુહે |
ઉદઞ્ચિતકપાલકં જઘનસીમ્નિ સન્દર્શિતદ્વિપાજિનમનુક્ષણં કિમપિ ધામ વન્દામહે || ૧||

વૃષોપરિ પરિસ્ફુરદ્ધવળધામ ધામ શ્રિયાં કુબેરગિરિગૌરિમપ્રભવગર્વનિર્વાસિ તત |
ક્વચિત્પુનરુમાકુચોપચિતકુઙ્કુમૈ રઞ્જિતં ગજાજિનવિરાજિતં વૃજિનભઙ્ગબીજં ભજે ||૨||

ઉદિત્વરવિલોચનત્રયવિસુત્વરજ્યોતિષા કલાકરકલાકરવ્યતિકરેણ ચાહર્નિશમ |
ષિકાસિતજટાટવીવિહરણોત્સવપ્રોલ્લસત્તરામરતરઙ્ગિણીતરલચૂડમીડે મૃડમ ||૩||

વિહાય કમલાલયાવિલસિતાનિ વિદ્યુન્નટીવિડમ્બનપટૂનિ મે વિહરણં વિધત્તાં મનઃ |
કપર્દિનિ કુમુદ્વતીરમણખણ્ડચૂડામણૌ કટીતટપટીભવત્કરટિચર્મણિ બ્રહ્મણિ ||૪||

ભવદ્ભવનદેહલીનિકટતુણ્ડદણ્ડાહતિત્રુટન્મુકુટકોટિભિર્મઘવદાદિભિર્ભૂયતે વ્રજેમ
ભવદન્તિકં પ્રકૃતિમેત્ય પૈશાચિકીં કિમિત્યમરસંપદઃ પ્રમથનાથ નાથામહે ||૫||

ત્વદર્ચનપરાયણપ્રમથકન્યકાલુંઠિતપ્રસૂનસફલદ્રુમં કમપિ શૈલમાશાસ્મહે |
અલં તટવિતર્દિકાશયિતસિદ્ધસીમન્તીનીપ્રકીર્ણસુમનોમનોરમણમેરુણા મેરુણા||૬||

ન જાતુ હર યાતુ મે વિષયદુર્વિલાસં મનો મનોભવકથાઽસ્તુ મે ન ચ મનોરથાતિથ્યભૂઃ |
સ્ફુરત્સુરતરઙ્ગિણીતટકુટીરકોટૌ વસન્નયે શિવ દિવાનિશં તવ ભવાનિ પૂજાપરઃ ||૭||

વિભૂષણસુરાપગાશુચિતરાલવાલાવલીવલદ્વહલસી કરપ્રકરસેકસંવર્ધિતા |
મહેશ્વરસુરદ્રુમસ્ફુરિતસજ્જટામઞ્જરી નિમજ્જનફલપ્રદા મમ નુ હન્ત ભૂયાદિયમ ||૮||

બહિર્વિષયસઙ્ગતિપ્રતિનિવર્તિતાક્ષાવલેઃ સમાધિકલિતાત્મનઃ પશુપતેરશેષાત્મનઃ |
શિરઃસુરસરિત્તટીકુટિલકલ્પકલ્પદ્રુમં નિશાકરકલામહં બટુવિભૃશ્યમાનાં ભજે ||૯||

ત્વદીયસુરવાહિનીવિમલવારિધારાબલજ્જટાગહનગાહિની મતિરિયં મમ ક્રામતુ |
ઉપોત્તમસરિત્તટીવિટપિતાટવી પ્રોલ્લસત્તપસ્વિપરિષત્તુલામમલમલ્લિકાભ પ્રભો ||૧૦||

ઇતિ લઙ્કેશ્વરવિરચિતા શિવસ્તુતિઃ સંપૂર્ણા||

**www.shaivam.org**